National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 320-322
© 2026 NJHSR
www.sanskritarticle.com

**द्वितीकृष्ण पाणिग्राही**
साहित्यविभागः,
महाराजा श्रीरामचन्द्र भञ्जदेओ-
विश्वविद्यालयः, ओडिशा

**Correspondence:**
**द्वितीकृष्ण पाणिग्राही**
साहित्यविभागः,
महाराजा श्रीरामचन्द्र भञ्जदेओ-
विश्वविद्यालयः, ओडिशा

# मातृभूमिचरितमहाकाव्ये वर्णविन्यासवक्रता

**द्वितीकृष्ण पाणिग्राही**

**उपक्रमः -**

आधुनिकमहाकाव्येषु सम्प्रति नैकानि महाकाव्यानि विलसन्ति तेषु महाकाव्येषु मातृभूमि-चरितमकाव्यम् अन्यतमम्। अस्य महाकाव्यस्य रचयिता कविरश्मि इत्युपाधिना विभूषितः श्रीव्रजकिशोरत्रिपाठिवर्याः भवन्ति। कविरयम् उत्कलप्रान्ते जनिरभूत्। काव्यस्य आत्मनः सौन्दर्यमवाप्तये नैके आचार्याः विविधशैल्या काव्यं रचयन्ति। विरचितेऽस्मिन् महाकाव्ये वर्णविन्यसवक्रतायाः उदाहरणानि समुपलभ्यन्ते। इदम् एकादशसर्गात्मक-विशिष्टः महाकाव्यमस्ति। काव्येऽस्मिन् क्वचित् स्थलेषु वर्णविन्यासवक्रतायाः उदाहरणानि प्राप्यन्ते। आचार्यः कुन्तकः वक्रोक्तिम् एव काव्यस्यात्मा इति मतमुपस्थापयति। आचार्यः कुन्तकदिशा वर्णविन्यासवक्रतायाः उदाहरणानि प्रस्तौष्यते।

**वक्रोक्तेः समर्थकाः आचार्याः**

वक्रोक्तेः सिद्धान्तप्रतिपादने आचार्यकुन्तकस्य महत् योगदानं वर्तते। अनेन उच्यते वक्रोक्तिरेव काव्यस्याधारभूतत्त्वं भवति। वक्रोक्तिशब्दस्य तात्पर्यं भवति- वाक्छलं, वाक्-वैदग्ध्यं, वाचि व्यङ्ग्यात्मकभाव-प्रकटनम् इति कक्रोक्तिशब्दस्य तात्पर्यम्। यद्यपि वक्रोक्तिसम्प्रदायस्य आचार्यः कुन्तकः वर्तते तथापि कुन्तकाचार्यात् पूर्वमपि केचन आचार्याः वक्रोक्तिशब्दस्य प्रयोगं कृतवन्तः। सन्दर्भेऽस्मिन् सर्वादौ भामहस्य काव्यालङ्कारे वक्रोक्तिशब्दस्य प्रयोगः दृश्ययते। उच्यते सः अनया वक्रोक्त्या विना न किमपि अलङ्कारस्य अस्तित्वं प्राप्यते। उच्यते सः-

**सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते।**
**यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना ।।**[1]

आचार्यः दण्डिः काव्यादर्शे वक्रोक्तिविषये वदति यथा-

**श्लेषः सर्वासु पुष्णाति प्रायो वक्रोक्तिषु श्रियम्।**
**द्विधा भिन्नं स्वभावोक्तिर्वक्रोक्तिश्चेति वाङ्मयम् ।।**[2]

काव्यप्रकाशे मम्मटाचार्यः उच्यते-

**यदुक्तमन्यथावाक्यमन्यथाऽन्येन योज्यते।**
**श्लेषेण काक्वा वा ज्ञेया सावक्रोक्तिस्तथा द्विधा ।।**[3]

यत्र एकस्य जनस्य कथनस्य अभिप्रायः यदि कोपि अपरः अन्यथा अर्थः गृह्णाति तर्हि तत्र वक्रोक्तिसज्ञा भवति। इयं श्लेषवक्रोक्तिः काकुवक्रोक्तिभेदेन द्विधाविभागः वर्तते।

अचार्यः कुन्तकः वदति यत्- पाण्डित्ययुक्तवचनम् भावभङ्गिमया शब्दैः किमपि वैचित्र्यार्थबोधः यदि जायते सा वक्रोक्तिः इति कथ्यते। उच्यते तेन -

**वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते।**[4]

आचार्यः वक्रोक्तिं मुख्यत्वेन षड्भेदेन विभक्तः ते यथा-

1-वर्णविन्यासवक्रता

2-पदपूर्वाधवक्रता

3-पदपरार्धवक्रता

4-वाक्यवक्रता

5-प्रकरणवक्रता

6-प्रवन्धवक्रता

**विषयः-**

काव्येषु लभ्यमानाः अनुप्रासादयः अलङ्काराः ये भवन्ति तान् एवालङ्कारान् पुरस्कृत्य आचार्यकुन्तकेन वर्णविन्यासवक्रतारूपेण प्रतिपद्यते। वर्णानां विन्यासः वर्णविन्यासः तस्य वक्रता वर्णविन्यासवक्रता इति। वक्रता नाम कवेः काव्ये विचित्ररूपेण वर्णान् विन्यस्य अलौकिकं किमपि एकं चमत्कारपूर्ण-अर्थग्रहणं तत्र भवेत् वक्रोक्तिशब्दस्य आशयः। आचार्यस्य रचितस्य वक्रोक्तिजीविते द्वितीयोन्मेषे वर्णविन्यासवक्रतायाः विषये विषदरूपेण प्राप्यते। उच्यते अनेन कारिकायां यत्-

**एकौ द्वौ बहवोवर्णाः बध्यमानाः पुनः पुनः।**
**स्वल्पान्तरा स्त्रिधा सोक्ता वर्णविन्यासवक्रता ।।**
**वर्गान्तयोगिनः स्पर्शाः द्विरुक्तास्त-ल-नादयः।**
**शिष्टाश्चरादिसंयुक्ताः प्रस्तुतौचित्यशोभना ।।**
**क्वचिदव्यवधानेऽपि मनोहारिनिबन्धना ।**
**सा स्वराणामसारूप्यात् परां पुष्णाति वक्रताम् ।।**[5]

आहत्य कुन्तकेन वर्णविन्यासवक्रतायाः अष्टौ विछित्तयः प्रोक्ताः। ते यथा-

1. एकस्य एव व्यञ्जनवर्णस्य असकृत् अभ्यासः।
2. द्वयोः वर्णयोः एव असकृत् अभ्यासः।
3. बहूनां व्यञ्जनवर्णानाम् असकृत् अभ्यासः।
4. वर्गान्तयोगिनः (ङ,ञ,ण,न,म) वर्णानाम् असकृदभ्यासः।
5. त,ल,न, वर्णानाम् व्यञ्जनवर्णैः सह असकृदभ्यासः।
6. 'र्' वर्णस्य रेफस्य वा व्यञ्जनवर्णैः सह असकृदभ्यासः।
7. क्वचित् (व्यञ्जनवर्णस्यस्य) अव्यवधानेऽपि वर्णस्य अभ्यासः जायते।
8. क्वचित् समव्यञ्जनवर्णैः सह स्वरवर्णयुक्तेषु वर्णानाम् असकृत् आवृत्तिः।

एताः वर्णविन्यासवक्रताः मातृभूमिचरिते काव्ये उपनिवद्धा दृश्यन्ते। उत्कलप्रदेशस्य कविरश्मीत्युपाधिना बिभूषितः श्रीव्रजकिशोरत्रिपाठिवर्यैः विरचितः **मातृभूमिचरितमहाकाव्ये** काश्चन पंक्तयः यथामति अत्र उपस्थापयिष्यन्ते। यथा-

**कालीकालकरालवालकलिनी कालीकलार्त्रिणी**
**सृष्टेः तुष्टिविधायिनी निजरुचा देदिप्यमानायनी ।**
**स्फोटानां ध्वनिधारिणी दरहरा नक्तं दिवाकारिणी**
**भिद्याद् भासमयी भवाघपटलं दीपावली भामिनी ।।** [6]

पद्येऽस्मिन् प्रथमपंक्तौ **'क' 'ल'** कारयोः अनयोः व्यञ्जनवर्णयोः असकृदभ्यासजायमानः वर्तते। अन्तिमपंक्तौ **'भ'** कारव्यञ्जनवर्णस्य असकृदभ्यासः वरीवर्ति। उदाहरणेऽस्मिन् प्रथमचरणे द्वयोः व्यञ्जनवर्णयोः असकृदभ्यासकारणेन वर्णविन्यासवक्रतायाः भेदेषु द्वितीयो भेदः भवति। एवं च अन्तिमपंक्तौ **'भ'** वञ्जनवर्णस्य असकृदभ्यास-कारणेन वर्णविन्यासवक्रतायाः भेदेषु प्रथमोदाहरणं भवति।

**दीक्षादीप्तमुखा दिनान्तललिता दिव्यच्छिखा मञ्जुला**
**पान्थाभीलविनाशिनी सममनस्सन्तोषिणी प्रेमिणी**
**वक्षस्थद्युतिवर्द्धिनी कनकभाशान्तिप्रदानन्ददा**
**लीलादानकरी महासुखकरी दीपावली दीप्यताम् ।।**[7]

पद्येऽस्मिन् प्रथमचरणे **'द'** वर्णस्य असकृदभ्यासः वर्तते। अत्र एकस्य एव वर्णस्य अभ्यासः वरीवर्तीत्यतः वर्णविन्यासवक्रतायाः प्रथमकारिकायाः भेदेषु प्रथमभेदः भवति।

**वर्षापातभयं विहाय सजलं स्वीकृत्य रक्ताम्बरम्**
**सोमे सोमशिरः कृते सुसरितः संगृह्य शुद्धं जलम् ।**
**आस्ये शम्भुपदं विमुक्तचरणाः स्कन्धेऽम्बुनो यष्टिकां**
**धृत्वा यान्ति शिवाभिषेकमनसो मार्गेखिले श्रावणे ।।**[8]

पद्येऽस्मिन् द्वितीयचरणे एकस्य एव **'स'** वर्णस्य असकृदभ्यासः जायमानः वर्तते। अत्र वर्णविन्यासवक्रतायाः भेदेषु तृतीयकारिकायाः द्वितीयोदाहरणमस्ति। पंक्तौ अत्र **'स'** कारः वर्णेषु व्यवधानकारणात् सप्तमोदाहरणं वर्तते।

**संसारः सारहीनो न किमपि सुखता राजते दुःखराजि**
**राजिं राजेन्द्रजालं भजति च जनता भ्राजते नैवशान्तिः।**
**राज्यं संत्यज्य पूज्यो व्रजति स रजनौ निर्ज्जने जापमग्नो**
**जीवार्हिंसाविरक्तः श्रमणगणमणिर्बुद्धदेवः पुनातु।।**[9]

पद्येऽस्मिन् द्वितीयचरणे **'र' 'ज'** वर्णयोः असकृदभ्यासः वर्तते। तृतीयपादे **'ज' 'न'** वर्णयोः अभ्यासः वर्तते। अतः अत्र वर्णविन्यासवक्रतायाः प्रथमकारिकानुसारं द्वितीयो भेदः वर्तते। पद्येऽस्मिन् द्वितीय पादे द्वयोः वर्णयोः अभ्यासः वर्तते। तृतीयपादे द्वयोः वर्णयोः अभ्यासः वरिवर्ति। अतः वर्णविन्यासवक्रतायाः भदेषु द्वितीयोदाहरणं भबति। एवं च चतुर्थपादे 'ण' कारस्य एकस्य एव वर्णस्य असकृदभ्यासकारणेन वर्णविन्यासवक्रतायाः भेदेषु प्रथमः भेदः भवति।

**स्थाने स्थाने सुरभिभरितो भासते मल्लिभारो**
**वृक्षे वृक्षे फलकिशलता लोकचित्तं हरन्ति।**
**ग्रामे ग्रामे युवतियुवका रङ्गलीलातिशक्ता**
**होलीक्रीडानिपुणसकलाः फाल्गुने पूर्णिमायाम् ।।**[10]

पद्येऽस्मिन् प्रथमचरणे **'भ'** वर्णस्य असकृदभ्यासः वर्तते द्वितीयचरणे **'ल'** वर्णस्य असकृदभ्यासः तृतीयचरणे **'य' 'व'** द्वयोः वर्णयोः

अभ्यासः वरिवर्ति। अतः आद्यपंक्ति द्वयं वर्णविन्यासवक्रतायाः भेदेषु प्रथमभेदः भवति। तृतीयचरणे द्वयो वर्णयोः अभ्यासकारणेन वर्णविन्यास-वक्रतायाः भेदेषु द्वितीयो भेदः भवति।

**होलिं चोलतले विलोक्य लगितां लोलाकला राधिका**
**तूर्णं क्षालयितुं जलाय यमुनां याति क्षणात् संभ्रमात् ।**
**कूले नन्दसुतं निशम्य चलते नम्रानना लज्जया**
**व्रीडाक्रीडनपाटवी विहसतीक्षित्वाखिलं दूरतः ।।**[11]

पद्येऽस्मिन् प्रथमचरणे **'ल'** एव वर्णस्य असकृदभ्यासः वरीवर्ति। अतः अत्र वर्णविन्यासवक्रताभेदेषु प्रथमभेदरूपः भवति।

**श्रुत्वा रासरसा वने परभृतो रावं वसन्ते मुहुः**
**बाधानाशनतत्परा शशिमुखी राधाजलं वाञ्छति ।**
**कालिन्द्याः सलिलं निधाय कलसे कूलं परिप्रेक्षते**
**तत्कालं ललनामुखे स रसिको होलीं मुदा लिम्पति ।।**[12]

पद्येऽस्मिन् तृतीयचरणे **'क' 'ल'** वर्णयोः असकृदभ्यासः वर्तते। अत्र वर्णविन्यासवक्रतायाः भेदेषु द्वितीयोदाहरयणं भवति । यतः तृतीयचरणे द्वयोः वर्णयोः असकृदभ्यासः जायमानः वर्तते।

**राधाराधं हृदयदयितं नन्दनन्दं विनन्दम्**
**आनन्दान्धा बहु विदधते साधुतां बाधयित्वा।**
**प्राप्य प्रीतिं परमरसिको लिम्पति प्रेमदीप्तो**
**होलीचूर्णं ललितलपने पालयेन्नः स कृष्णः ।।**[13]

पद्येऽस्मिन् प्रथमपंक्तौ **'त'** स्ववर्गस्य अन्त्यवर्णेन **'द'** कारेण सह युक्तः सन् त्रिवारम् आवृत्तोऽस्ति। अयं वर्णविन्यासवक्रतायाः क्रमभेदेषु चतुर्थोदाहरणं वर्तते। पुनः पद्येऽस्मिन् एतदतिरिच्य वर्णविन्यास-वक्रतायाः क्रमभेदेषु अन्योदाहरणानि प्राप्यते यथा-

**(अ)** प्रथमचरणे **'र' 'ध' 'द' 'य' 'न'** वर्णानाम् असकृदभ्यासः वरिवर्ति,

**(ब)** द्वितीयचरणे **'व' 'ध' 'त'** वर्णानाम् असकृदभ्यासः वर्तते ,

**(स)** तृतीयपंक्तौ **'प' 'र'** वर्णयोः आवृत्तमस्ति,

**(द)** चतुर्थपंक्तौ **'ल'** एकस्य वर्णस्य बहुवारं प्रयुक्तो वर्तते ।

अयं वर्णविन्यासवक्रतायाः क्रमभेदेषु तृतीयोदाहरणं वर्तते। यतःपद्ये अत्र बहूनां व्यञ्जनवर्णानां पुनः पुनः अभ्यासः वरिवर्ति।

**रम्ये नीलवने घने नलवने नीलाङ्गवर्णाः खगाः**
**सानन्दं बहुदूरनिर्जनतटात् कुर्वन्ति कोलाहलम् ।**
**शैवालाढ्यजलात् प्रमोदहृदया गृह्णन्ति खाद्यं मुदा**
**तेषां सौम्यतनुं विहारविषयं दृष्ट्वा मनो मोदते ।।**[14]

पद्येऽस्मिन् प्रथमपंक्तौ **'न' 'ल'** वर्णयोः असकृदभ्यासः वरिवर्ति। अत्र **'नील' 'वने'** अनयोः शब्दयोः पुनः पुनः आवृत्तो वर्तते। पुनः अत्र **'नील' 'वने' 'घने'** शब्देषु आवृत्तः प्रथम **'न्'** वर्णे **'ई'** कारः द्वितीय **'न्'** कारे **'ए'** स्वरवर्णस्य युक्तो वर्तते **'ल्'** वर्णे **'अ'** स्वरवर्णयुक्तः वर्तते। अत्र वर्णेषु **'न'** कारे स्वरवर्णस्य विषमता वर्तते **'ल'** वर्णे समतायाः रूपं प्राप्यते। अतः वर्णविन्यासवक्रतायाः भेदेषु अष्टमो भेदः भवति।

**उपसंहारः –**

महाकाव्यपरम्परायां कवीनां कृतिषु इयं वर्णविन्यासवक्रतायाः वर्णनं बहुत्र प्राप्यते। आधुनिककाव्येषु श्रीव्रजकिशोरत्रिपाठि महाभागानाम् अस्यां मातृभूमिचरितकृतौ वर्णविन्यासवक्रता-साधने चमत्कार-प्रतिभा दृश्यते। काव्येऽस्मिन् श्रीव्रजकिशोरत्रिपाठि महाभागाः वर्णविन्यासवक्रतायाः पद्यानि सर्गेषु बहुत्र उपनिवद्धः कृतः। अतः इमे महाभागाः काव्येऽस्मिन् वर्णविन्यास-वक्रतायाः पद्यानां निरूपणे महत् योगदानं भवतीति वक्तुं शक्यते ।

➢ **संगृहितग्रन्थाः-**

1. वक्रोक्तिजीवितम्, राजानककुन्तक
2. मातृभूमिचरितम्, श्री व्रजकिशोरत्रिपाठि
3. काव्यशास्त्रे प्रस्थानवादविमर्शः, डॉ. हीरालाल दाशः
4. काव्यालङ्कारः, भामहः
5. साहित्यदर्पणः, विश्वनाथकविराजः
6. काव्यप्रकाशः, मम्मटः
7. अन्तर्जालपुटम्

**संदर्भ-सूची**

[1]भा.का.अ 2.85 पृ.62
[2]का.द. 2.362
[3]का.प्र पृ.395
[4]व.जी. 1.10
[5]वक्रोक्तिजीवितम् 2.1-3
[6]मातृभूमिचरितम् 6.53
[7]मातृभूमिचरितम्6.54
[8]मातृभूमिचरितम् - 6.38
[9]तत्रैव 6.15
[10] मा.च 6.72
[11] मा.च 6.75
[12] मा.च. 6.76
[13] मा.च 6.77
[14] मा.च. 8.5